# 13. विमानयानं रचयाम

---

**अभ्यासः**

**प्रश्न 1. पाठे दत्तं गीतं सस्वरं गायत**

(पाठ में दिए गीत को सस्वर गाएँ)

**प्रश्न 2. कोष्ठकान्तर्गतेषु शब्देषु तृतीया-विभक्तिं योजयित्वा रिक्तस्थानानि पूरयत**

(कोष्ठक में स्थित शब्दों में तृतीया विभक्ति का योग करके रिक्त स्थान पूर्ति करें)
यथा-नभः चन्द्रेण शोभते। (चन्द्र)

(क) सा .................... जलेन मुखं प्रक्षालयति। (विमल)
(ख) राघवः ................... विहरति। (विमानयान)
(ग) कण्ठः ................... शोभते। (मौक्तिकहार)
(घ) नभः ................... प्रकाशते। (सूर्य)
(ङ) पर्वतशिखरम् .................. आकर्षकं दृश्यते। (अम्बुदमाला)

**उत्तर:**
(क) सा विमलेन जलेन मुखं प्रक्षालयति।
(ख) राघवः विमानयानेन विहरति।
(ग) कण्ठः मौक्तिकहारेण शोभते।
(घ) नभः सूर्येण प्रकाशते।
(ङ) पर्वतशिखरम् अम्बुदमालया आकर्षकं दृश्यते

**प्रश्न 3. भिन्नवर्गस्य पदं चिनुत**
(भिन्न वर्ग का पद चुनें) — भिन्नवर्गः
यथा-सूर्यः, चन्द्रः, अम्बुदः, शुक्रः। — अम्बुदः
(क) पत्राणि, पुष्पाणि, फलानि, मित्राणि। ................
(ख) जलचरः, खेचरः, भूचरः, निशाचरः। ................
(ग) गावः, सिंहाः, कच्छपाः, गजाः। ................
(घ) मयूराः, चटकाः, शुकाः, मण्डूकाः। ................
(ङ) पुस्तकालयः, श्यामपट्टः, प्राचार्यः, सौचिकः। ................
(च) लेखनी, पुस्तिका, अध्यापिका, अजा। ................

**उत्तरः**
(क) पत्राणि, पुष्पाणि, फलानि, मित्राणि। — मित्राणि
(ख) जलचरः, खेचरः, भूचरः, निशाचरः। — निशाचरः
(ग) गावः, सिंहाः, कच्छपाः, गजाः। — कच्छपाः
(घ) मयूराः, चटकाः, शुकाः, मण्डूकाः। — मण्डूकाः
(ङ) पुस्तकालयः, श्यामपट्टः, प्राचार्यः,सौचिकः।– सौचिकः
(च) लेखनी, पुस्तिका, अध्यापिका, अजा। — अजा

**प्रश्न 4. प्रश्नानाम् उत्तराणि लिखत (प्रश्नों के उत्तर लिखें)**
(क) के वायुयानं रचयन्ति?
(ख) वायुयानं कं-कं क्रान्त्वा उपरि गच्छति?
(ग) वयं कीदृशं सोपानं रचयाम?
(घ) वयं कस्मिन् लोके प्रविशाम?
(ङ) आकाशे काः चित्वा मौक्तिकहारं रचयाम?
(च) केषां गृहेषु हर्ष जनयाम?

**उत्तरः**
(क) राघवः, माधवः, सीता, ललिता च वायुयानं रचयन्ति।
(ख) वायुयानम् उन्नतवृक्षं तुङ्गभवनं च क्रान्त्वा उपरि गच्छति।
(ग) वयं हिमवन्तं सोपानं रचयाम।
(घ) वयं चन्द्रलोके प्रविशाम।
(ङ) वयं आकाशे ताराः चित्वा मौक्तिकहारं रचयाम।
(च) वयं दुःखितपीडितकृषकाणां गृहेषु हर्ष जनयाम।

**प्रश्न 5. विलोमपदानि योजयत (विलोम पदों का योग करें)**

| | |
|---|---|
| उन्नतः | पृथिव्याम् |
| गगने | असुन्दरः |
| सुन्दरः | अवनतः |
| चित्वा | शोकः |
| दुःखी | विकीर्य |
| हर्षः | सुखी |

**उत्तरः**

| पदम् | विलोमपदम् |
|---|---|
| उन्नतः | अवनतः |
| गगने | पृथिव्याम् |
| सुन्दरः | असुन्दरः |
| चित्वा | विकीर्य |
| दुःखी | सुखी |
| हर्षः | शोकः |

**प्रश्न 6. समुचितैः पदैः रिक्तस्थानानि पूरयत**

(समुचित पदों के द्वारा रिक्त स्थान पूर्ति करें)

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | भानुः | भानू | ............... |
| द्वितीया | ............... | ............... | गुरून् |
| तृतीया | ............... | पशुभ्याम् | ............... |
| चतुर्थी | साधवे | ............... | ............... |
| पञ्चमी | वटोः | ............... | ............... |
| षष्ठी | गुरोः | ............... | ............... |
| सप्तमी | शिशौ | ............... | ............... |
| सम्बोधन | हे विष्णो ! | ............... | ............... |

**उत्तरः**

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | भानुः | भानू | **भानवः** |
| द्वितीया | **गुरुम्** | **गुरू** | गुरून् |
| तृतीया | **पशुना** | पशुभ्याम् | **पशुभिः** |
| चतुर्थी | साधवे | **साधुभ्याम्** | **साधुभ्यः** |
| पञ्चमी | वटोः | **वटुभ्याम्** | **वटुभ्यः** |
| षष्ठी | **गुरोः** | गुर्वोः | **गुरूणाम्** |
| सप्तमी | शिशौ | **शिश्वोः** | **शिशुषु** |
| सम्बोधन | हे विष्णो! | **हे विष्णू!** | **हे विष्णवः!** |

**प्रश्न 7. पर्याय-पदानि योजयत**
(पर्याय पदों का मेल करें)

| | |
|---|---|
| गगने | जलदः |
| विमले | निशाकरः |
| चन्द्रः | आकाशे |
| सूर्यः | निर्मले |
| अम्बुदः | दिवाकरः |

**उत्तरः**
गगने — आकाशे
विमले — निर्मले
चन्द्रः — निशाकरः
सूर्यः — दिवाकरः
अम्बुदः — जलदः